# 2020

## SANSKRIT

Paper : SHC-103

Full Marks : 80 Time : 4 Hours

Attempt ***any four*** of the following **selecting at least one question from each group** & answer ***any one*** of those in **Sanskrit** with ***Devanāgarī*** Script.

प्रतिविभागतः **अवश्यमेव प्रश्नमेकम्** आहत्य यथेच्छं **प्रश्नचतुष्टयस्य** उत्तरं प्रदेयम्। **तत्र कस्यचिदेकस्य प्रश्नस्य उत्तरमवश्यमेव संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्।**

### Group – A

विभागः – कः

1. मम्मटोक्तकाव्यलक्षणं विश्वनाथदिशा सयौक्तिकं निरस्तीक्रियताम्। अस्मिन्नवसरे विश्वनाथसम्मतं काव्यलक्षणं यथादर्पणमुनस्यताम्। 13 + 07 = 20

2. साहित्यदर्पणानुसारेण व्यञ्जनायाः स्वरूपं व्याख्यायताम्। अस्त विभागाः यथायोगमुपन्यस्य अभिधामूला व्यञ्जना विश्वनाथदिशा सविस्तरं सोदाहरणं विचार्यताम्। 05 + 15 = 20

3. का नाम लक्षणा साहित्यदर्पणसम्मता? लक्षणाया लक्षणे के हेतवः प्रयोजनीया भवन्ति? लक्षणाया मुख्यभेदाः साहित्यदर्पणदृष्ट्या दर्शयताम्। 02 + 03 + 15 = 20

4. प्रसङ्गनिर्देशपूर्वकं कारिकाचतुष्टयस्य व्याख्या सुरगिरा कार्या। 05 x 04 = 20

i) नरत्वं दुर्लभं लोके विद्यास्तत्र सुदुर्लभा।
कवित्वं दुर्लभं लोके शक्तिस्तत्र सुदुर्लभा॥

ii) योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥

iii) वाक्यं स्यादाकाङ्क्षायोग्यतासत्तियुक्तः पदोच्चयः।

iv) चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥

v) सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च।

vi) सत्त्वोद्रेकादखण्डप्रकाशानन्दचिन्मयः।
वेदान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥

## Group – B
## विभागः – खः

5. मम्मटोक्तदिशा काव्यस्य प्रयोजनानि सविस्तरं दृष्टान्तप्रदानपुरःसरं निगद्यताम्। 20

6. काव्यप्रकाशानुसारं काव्यहेतुः सानुपुङ्खम् आलोच्यताम्। हेतुलक्षणे "हेतुर्न तु हेतवः" इत्यस्य तात्पर्यं किमुक्तं ग्रन्थकृता? 18 + 02 = 20

7. अधोलिखितेषु यथेच्छम् अलङ्कारचतुष्टयं मम्मटदिशा सलक्षणं सोदाहरणं व्याख्यायताम्। 05 x 04 = 20

यमकम्, रूपकम्, अपह्नुतिः, विशेषोक्तिः, समासोक्तिः, दृष्टान्तः

8. a) अधोलिखितासु कारिकाद्वयं सप्रङ्गं व्याख्यायताम्। 05 x 02 = 10
   i) तददोषौ शब्दार्थौ सगुणावलङ्कृती पुनः क्वापिः।
   ii) इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः।
   iii) अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्।

   b) अधस्तनेषु श्लोकेषु द्वयोः अलङ्कारः निर्णीयताम्। 05 x 02 = 10
   i) स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति।
   प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा॥
   ii) लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
   असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥
   iii) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
   तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥
   iv) निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम्।
   पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्॥

---